# bindumAdhavAShTakam

# બિન્દુમાધવાષ્ટકમ્

## Document Information

Text title : bindumAdhavAShTakam

File name : bindumaadhava8.itx

Category : aShTaka, vishhnu, krishna, vishnu

Location : doc_vishhnu

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 13, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# બિન્દુમાધવાષ્ટકમ્

શ્રી ગણેશાય નમઃ ।
કલિન્દજાતટાટવીલતાનિકેતનાન્તર-
પ્રગલ્ભવલ્લવિસ્ફુરદ્રતિપ્રસઙ્ગસઙ્ગતમ્ ।
સુધારસાર્દ્રવેણુનાદમોદમાધુરીમદ-
પ્રમત્તગોપગોવ્રજં ભજામિ બિન્દુમાધવમ્ ॥ ૧॥

ગદારિશઙ્ખચક્રશાર્ઙ્ગભૃચ્ચતુષ્કરં કૃપા-
કટાક્ષવીક્ષણામૃતાક્ષિતામરેન્દ્રનન્દનમ્ ।
સનન્દનાદિમૌનિમાનસારવિન્દમન્દિરં
જગત્પવિત્રકીર્તિદં ભજામિ બિન્દુમાધવમ્ ॥ ૨॥

દિગીશમૌલિનૂત્નરત્નનિઃસરત્પ્રભાવલી-
વિરાજિતાંઘ્રિપઙ્કજં નવેન્દુશેખરાબ્જજમ્ ।
દયામરન્દતુન્દિલારવિન્દપત્રલોચનં
વિરોધિયૂથભેદનં ભજામિ બિન્દુમાધવમ્ ॥ ૩॥

પયઃ પયોધિવીચિકાવલીપયઃપૃષન્મિલદ્ભુજઙ્ગ-
પુઙ્ગવાઙ્ગકલ્પપુષ્પતલ્પશાયિનમ્ ।
કટીતટિસ્ફુટીભવત્પ્રતપ્તહાટકામ્બરં
નિશાટકોટિપાટનં ભજામિ બિન્દુમાધવમ્ ॥ ૪॥

અનુશ્રવાપહારકાવલેપલોપનૈપુણી-
પયશ્ચરાવતારતોષિતારવિન્દસમ્ભવમ્ ।
મહાભવાબ્ધિમધ્યમગ્નદીનલોકતારકં
વિહઙ્ગરાટ્તુરઙ્ગમં ભજામિ બિન્દુમાધવમ્ ॥ ૫॥

સમુદ્રતોયમધ્યદેવદાનવોત્ક્ષિપદ્ધરા-
ધરેન્દ્રમૂલધારણક્ષમાદિકૂર્મવિગ્રહમ્ ।
દુરાગ્રહાવલિપ્તહાટકાક્ષનાશસૂકરં

હિરણ્યદાનવાન્તકં ભજામિ બિન્દુમાધવમ્ ॥ ૬॥

વિરોચનાત્મસમ્ભવોત્તમાઙ્ગકૃત્પદઙ્કમં
પરશ્વધોપસંહૃતાખિલાવનીશમણ્ડલમ્ ।
કઠોરનીલકણ્ઠકાર્મુકપ્રદર્શિતાદિ-
દોર્બલાન્વિતક્ષિતીસુતં ભજામિ બિન્દુમાધવમ્ ॥ ૭॥

યમાનુજોદકપ્રવાહસત્ત્વરાભિજિત્વરં
પુરાસુરાઙ્ગનાભિમાનનૂપભૂપનાયકમ્ ।
સ્વમણ્ડલાગ્રખણ્ડનીયયાવનારિમણ્ડલં
બલાનુજં ગદાગ્રજં ભજામિ બિન્દુમાધવમ્ ॥ ૮॥

પ્રશસ્તપઞ્ચચામરાખ્યવૃત્તભેદભાસિતં
દશાવતારવર્ણનં નૃસિંહભક્તવર્ણિતમ્ ।
પ્રસિદ્ધબિન્દુમાધવાષ્ટકં પઠન્તિ યે ભૃશં
નરા સુદુર્લભં ભજન્તિ તે મનોરથં નિરન્તમ્ ॥ ૯॥

॥ ઇતિ શ્રીબિન્દુમાધવાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*bindumAdhavAShTakam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*